श्रीश्री गुरुगौराङ्गौ जयतः

# भक्तचरितम्

कक्षा ७



भक्तिवेदान्त गुरुकुलम् एवम् अन्तर्राष्ट्रियविद्यालयः, वृन्दावनम्

संस्थापकाचार्यः – कृष्णकृपामूर्तिः अभयचरणारविन्दभक्तिवेदान्तस्वामीप्रभुपादः


लेखकाः

लीलापुरुषोत्तमदासः

बलरामकृपादासः

पवनगोयलः

# विषय–सूची


| अध्यायः | विषयः | पृष्ठः |
|---|---|---|
| प्रथमः | श्रीचैतन्यदेवः | २ |
| द्वितीयः | भक्तः ध्रुवः | ७ |
| तृतीयः | गङ्गामाता | १४ |
| चतुर्थः | देवर्षिः नारदः | २० |
| पञ्चमः | मत्स्यावतारः | २५ |
| षष्ठः | कथोपकथनम् – १ | ३२ |
| सप्तमः | कथोपकथनम् – २ ( वृन्दावनस्य बालकृष्णः ) | ३७ |

प्रथमः अध्यायः


# श्रीचैतन्यदेवः



श्रीचैतन्यदेवस्य बहूनि नामानि सन्ति । तेषु नामसु गौराङ्गः महाप्रभुः निमाई पण्डितः विश्वम्भरः शचिसुतः श्रीकृष्णचैतन्यः इत्यादीनि नामानि प्रसिद्धानि सन्ति । महाप्रभुः १४८६ तमे वर्षे शुक्लपक्षे पूर्णिमायां तिथौ नवद्वीपस्थिते मायापुरग्रामे आविर्भूतवान् । शचिदेवी तस्य माता च जगन्नाथमिश्रः तस्य पिता । विश्वरूपः तस्य अग्रजः ।

अष्टवर्षीयः गौराङ्गः गङ्गादासपण्डितस्य पाठशालायां विद्यारम्भं कृतवान् । सः केवलेन वर्षद्वयेन व्याकरणे दर्शने स्मृति आदिषु शास्त्रेषु च स्वाभ्यासेन एव पारङ्गतः जातः (अभवत्) । तेन पञ्चदशवार्षिकेण चैतन्यदेवेन स्वविद्यालयः उद्घाटितः तथा च निमाई पण्डित नाम्ना प्रसिद्धः जातः । तदानीं नवद्वीपः समग्रभारते संस्कृतशिक्षायाः कृते विशेषेण न्यायदर्शनस्य कृते प्रसिद्धः आसीत् । नवद्वीपस्य नैयायिकाः स्मार्तपण्डिताः च अन्ये अपि निमाई पण्डितात् शास्त्रार्थे भयं कुर्वन्ति स्म । एकदा कश्मीरदेशीयः पण्डितः केशवमिश्रः भारतस्य विख्यातान् पण्डितान् पराभूय आत्मानं दिग्विजयिनं घोषितवान् । सः अन्तिमं प्रतिद्वन्द्विनम् अपि पराभवितुं नवद्वीपं प्रविष्टवान् । तस्मात् भीताः नवद्वीपपण्डिताः कानिचित् कारणानि प्रदर्श्य अन्यत्र पलायितवन्तः । निमाईपण्डितेन सह तस्य मेलनं बाराकोणनामके गङ्गाघट्टे जातम् (अभवत्) । परन्तु सः पण्डितः निमाईपण्डितेन सहजेन पराजितः ।

यदा चैतन्यदेवः अष्टादशवर्षीयः आसीत् तदा सः नवद्वीपे संकीर्तनयज्ञस्य



शुभारम्भं कृतवान् । सः संकीर्तनयज्ञः अल्पेन एव कालेन सर्वत्र दावाग्निः इव व्याप्तः जातः । केचित् विद्वेषिणः जनाः काजीमहोदयं मिलित्वा संकीर्तनयज्ञं निन्दितवन्तः । एतत् श्रुत्वा काजीमहोदयः श्रीवासपण्डितस्य गृहम् आगत्य मृदङ्गभङ्गं कृतवान् । तत्पश्चात् सः भापनं दत्त्वा कथितवान् यत् विश्वम्भरेण सङ्कीर्तनयज्ञः स्थगितव्यः । विश्वम्भरः एतत् वृत्तान्तं श्रुत्वा काजीमहोदयस्य विरोधे सार्वजनिकस्य विद्रोहस्य घोषणां कृतवान् । सहस्रं जनाः स्वहस्तेषु दण्डवर्त्तिकाः नीत्वा काजीमहोदयस्य प्रासादस्य पुरतः एकत्री अभवन् । श्रीचैतन्येन काजीमहोदयः आश्वस्तः यत् अत्र उपस्थिताः जनाः भवतः हानिं न करिष्यन्ति । श्रीचैतन्यः प्रासादस्य अन्तः काजीमहोदयेन सह एकान्ते युगधर्मसम्बन्धिनीं वार्तां कृतवान् । काजीमहोदयः संकीर्तनयज्ञस्य महत्त्वं ज्ञात्वा स्वदुराचरणं च स्मृत्वा रोदनं कृतवान् । सः अपि संकीर्तनयज्ञस्य प्रचाराय श्रीचैतन्यदेवस्य सहायतां कृतवान् ।

एवम् एव श्रीचैतन्यदेवः सर्वत्र संकीर्तनयज्ञस्य प्रसारं प्रचारं च कृतवान् ।



श्रीचैतन्यदेवः एतस्मिन् प्रयासे श्रीनित्यानन्दप्रभुणा श्रीवासपण्डितेन अद्वैताचार्येण गदाधरपण्डितेन राजाप्रता–परूद्रेण अन्यैश्च भक्तैः अपि सहायतां प्राप्तः (प्राप्तवान् )। तस्य प्रधानेषु शिष्येषु श्रीरूपः श्रीसनातनः श्रीरघुनाथभट्टः

श्रीरघुनाथदासः श्रीगोपालभट्टः श्रीजीवः च एते अग्रगण्याः सन्ति । ते सर्वे वृन्दावने निवासं कुर्वन्तः भक्तिग्रन्थान् प्रकशितवन्तः । वस्तुतः तु श्रीचैतन्यदेवः श्रीकृष्णः स्वयम् एव । एतस्य प्रमाणं श्रीमद्भागवते निम्नलिखितश्लोकेन वर्णितम् अस्ति।

*कृष्णवर्णं त्विषाकृष्णं साङ्गोपाङ्गास्त्रपार्षदम् ।*
*यज्ञैः संकीर्तनप्रायैर्यजन्ति हि सुमेधसः ॥*

वस्तुतः सः कृष्णः परन्तु तस्य कान्तिः गौरा । कलौ सः गौराङ्गः अङ्गैः उपाङ्गैः स्वपार्षदैः सह भारतवर्षे अवतीर्णः जातः । सुमेधसः जनाः संकीर्तनयज्ञेन तं महाप्रभुं यजन्ति । श्रीचैतन्यदेवस्य मुख्यः पार्षदः श्रीलप्रभुपादः तस्य संकीर्तनयज्ञं संपूर्णे संसारे प्रसारितवान् । श्रीरूपेण श्रीचैतन्यदेवस्य करुणां दृष्ट्वा तस्य महिमा अधोलिखितेन श्लोकेन वर्णितः अस्ति ।

*नमो महावदान्याय कृष्णप्रेमप्रदायते ।*
*कृष्णाय कृष्णचैतन्यनाम्ने गौरत्विषे नमः ॥*

* हरे कृष्ण !*

<u>*प्रश्नोत्तर–विभागः*</u>

१. श्रीचैतन्यदेवस्य प्रसिद्धानि नामानि लिखन्तु ।

२. श्रीचैतन्यदेवः कदा आविर्भूतः ?

३. श्रीचैतन्यदेवस्य मातुः नाम किम् ।

४. कतिवर्षीयः गौराङ्गः विद्यारम्भं कृतवान् ?

५. नवद्वीपः कस्य कृते प्रसिद्धः आसीत् ?

६. कश्मीरदेशीयः पण्डितस्य नाम किम् आसीत् ?

७. काजीमहोदयः किं श्रुत्वा किं च स्मृत्वा रोदनं कृतवान् ?

८. श्रीविश्वम्भरस्य (चैतन्यदेवस्य) शिष्याः के ? नामानि कानि ।

९. सुमेधसः जनाः केन यज्ञेन महाप्रभुं यजन्ति ?

१०. श्रीचैतन्यदेवस्य प्रणाममन्त्रं लिखन्तु ।

११. श्रीचैतनयदेवेन सञ्चालितान्दोलनं सङ्क्षिप्तरूपेण वर्ण्यताम् ।

## *रिक्तस्थानं पूरयन्तु*

१. महाप्रभुः ____________तमे वर्षे शुक्लपक्षे पूर्णिमायां तिथौ नवद्वीपस्थिते मायापुरग्रामे आविर्भूतवान् ।

२. ________ तस्य माता च__________तस्य पिता ।

३.__________ गौराङ्गः गङ्गादासपण्डितस्य पाठशालायां विद्यारम्भं कृतवान् ।

४. तदानीं नवद्वीपः समग्रभारते संस्कृतशिक्षायाः कृते विशेषेण ____________ कृते प्रसिद्धः _______ ।

५. ______ चैतन्यदेवः अष्टादशवर्षीयः आसीत् ______ सः नवद्वीपे संकीर्तनयज्ञस्य शुभारम्भं कृतवान् ।

६. एतत् श्रुत्वा ___________ श्रीवासपण्डितस्य गृहं आगत्य __________ कृतवान् ।

७. काजीमहोदयः संकीर्तनयज्ञस्य महत्त्वं __________ स्वदुराचरणं च _______ रोदनं कृतवान् ।

८. ते सर्वे वृन्दावने निवासं कुर्वन्तः भक्तिग्रन्थान् ___________ ।

९. नमो ________ कृष्णप्रेमप्रदायते ।

________ कृष्णचैतन्यनाम्ने गौरत्विषे नमः ॥

१०. सुमेधसः जनाः ______________तं महाप्रभुं यजन्ति ।

## *व्याकरण–विभागः*

१. निम्नलिखितधातुरूपाणां मूलधातून् सम्यक्रूपेण अवलोकयन्तु वाक्यानि च रचयन्तु ।

आविर्भूतः – [आवि+भू]

जातः – [जन्+क्त]

उपरि दृष्ट्वा निम्नलिखितशब्दानाम् अपि प्रयोगं कुर्वन्तु ।

घोषितवान् [घुष्+क्तवतु], प्रविष्टवान् [प्र+विश्+क्तवतु], पलायितवन्तः [], पराजितः[परा+जि+क्त], निन्दितवन्तः [निन्द्+क्तवतु], प्राप्तः [प्र+आप्+क्त], प्रकाशितवन्तः [प्र+काश्+क्तवतु], यजन्ति [यज्] ।

२. निम्नलिखितशब्दरूपाणां मूलशब्दान् सम्यक्रूपेण अवलोकयन्तु वाक्यानि च रचयन्तु ।

विख्यातान् – [विख्यात]

स्मृतौ – [स्मृति]


उपरि दृष्ट्वा निम्नलिखितशब्दानाम् अपि प्रयोगं कुर्वन्तु ।

दर्शने, कालेन, केचित्, एतस्य, सुमेधसः [सुमेधस्] ।

॥ हरि ॐ तत्सत् ॥

द्वितीयः अध्यायः

## भक्तः ध्रुवः




स्वायम्भुवमन्वन्तरे सत्ययुगे उत्तानपादः नाम एकः कुशलः राजा आसीत् । तस्य सुनीतिः सुरूचिः च पत्निद्वयम् आसीत् । तयोः सुरुचिः राज्ञः प्रेयसी आसीत् । सुनीतिसुतस्य ध्रुवस्य अपेक्षया सुरुचिसुतः उत्तमः राज्ञः प्रियः आसीत् । एकदा राजा उत्तमम् अंकम् आरोप्य लालयन् आसीत् । ध्रुवः तद्दृष्ट्वा उत्तमसदृशं पितृसुखं प्राप्तुम् इष्टवान् । परन्तु राज्ञा ध्रुवस्य प्रयासः न अभिनन्दितः । ध्रुवस्य प्रयासं दृष्ट्वा सुरुचिः अपि तं तिरष्कृतवती । सुरुच्या उक्तं यत् यदि भवान् नृपतेः अङ्कम् अरोढुम् इच्छति चेत् भवता मम कुक्षौ आगन्तव्यं भविष्यति ।

ध्रुवः विमातुः दुरुक्तिविद्धं वचनं श्रुत्वा स्वपितरं मौनं च दृष्ट्वा दीर्घश्वसन् तस्मात् स्थानात् निर्गतः । सुनीतिः प्ररुदन्तं पुत्रं दृष्ट्वा तम् उत्सङ्गे उत्थाप्य प्रशमनं कृतवती । सा पौरजनेभ्यः सर्वं वृत्तान्तं श्रुत्वा व्यथितवती । सा धैर्यं त्यक्त्वा शोकदावाग्निना ज्वलितलता इव विलापं कृतवती । सा सपत्न्याः वाक्यं स्मरन्ती अश्रुलोचना जाता । परेषु अमङ्गलं न वाञ्छितव्यम् । यः परस्मै दुःखं ददाति सः एव दुःखं प्राप्नोति इति माता ध्रुवम् उपदिष्टवती । यदि उत्तमसदृशम् अध्यासनम् इच्छति तर्हि अधोक्षजस्य पादपद्मम् एव आराधयतु इति सुनीत्या ध्रुवः उपदिष्टः ।



ध्रुवः मात्रा सञ्जल्पितम् आकर्ण्य आत्मानं मनसा सन्नियम्य पितुः पुरात् निर्गतः । नारदः ध्रुवसंवादम् उपाकर्ण्य तस्य समीपम् आगतः तेन इदम् च उक्तं यत् योगेन पर–मपुरुषस्य प्राप्तिः दुःसाध्या एव भवति । मुनयः बहुभिः जन्मभिः समाधिना परम–पुरुषम् अन्वेषयन्तः अपि तं न ज्ञान्तवन्तः । नारदः ध्रुवम् उपदिष्टवान् यत् बालेन सुखदुखयोः संतुष्टः कथं भवितव्यः एतत् एव तेन अभ्यासः करणीयः । सुरुच्याः दुरुक्तबाणैः आविद्धः ध्रुवः नारदस्य उपदेशान् न स्वीकृतवान् । सः स्वलक्ष्यं प्राप्तुं देवर्षिनारदं शरणं गतवान् । ध्रुवः स्वपितृभिः अपि अप्राप्तं पदं प्राप्तुं इष्टवान् । सः तस्मिन् कार्ये अटलः दृढसङ्कल्पश्च आसीत्।



बालध्रुवस्य एतादृशं निश्चयं दृष्ट्वा नारदः तव कृते ते जनन्या अभिहितः पन्थाः एव समीचीनः इति निश्चितवान् । नारदः कृष्णस्य ध्यानं कर्तुं तं यमुनातटस्थितं मधुवनं प्रेषितवान् । तत्र सः बालः घोरेण तपसा ध्यानेन च हरिं तुष्टवान् । भक्तवत्सलः हरिः स्वयं ध्रुवस्य समक्षं प्रादुर्भूतः । सः ध्रुवः हरिदर्शनेन दर्शनात् वा सर्वभौतिकाभिलाषैः मुक्तः जातः । परन्तु श्रीहरिः तं स्वयंप्रकाशितं ध्रुवलोकं प्रदाय इदञ्च घोषितवान् यत् केनचित् अपि एषः लोकः न अधिष्ठितः ।

गुरुभक्तिः दृढसंकल्पता अभयत्वं च ध्रुवस्य परमपदप्राप्तौ सहायकाः आसन्

। मुनयः समाधिना कोटिवत्सरपर्यन्तं प्रयासं कुर्वन्तः अपि परमपदं न प्राप्नुवन्ति परन्तु एकः पञ्चवर्षीयः बालः निश्चयेन तत् कर्तुं सफलः जातः । एतादृशः प्रसङ्गः इतिहासपृष्ठेषु विरल एव ।

* हरे कृष्ण *

## *प्रश्नोत्तर–विभागः*

१. उत्तानपादस्य पत्नीद्वयस्य किं नाम आसीत् ?

२. का राज्ञः प्रिया आसीत् ?

३. ध्रुवस्य मातुः नाम किम् ?

४. सुरूचिः ध्रुवं किम् उक्तवती ?

५. का सपत्न्याः वाक्यं श्रुत्वा अश्रुलोचना जाता ?

६. माता सुनीतिः ध्रुवं किम् उपदिष्टवती ?

७. ध्रुवः ग्रहात् निर्गत्य कुत्र गतवान् ?

८. केन परमपुरुषः दुःसाध्यः भवति ?

९. कः मार्गं ध्रुवम् उपदिष्टवान् ?

१०. ध्रुवस्य परमपदप्राप्तौ के पदार्थाः सहायकाः आसन् ?

११. ध्रुवः अल्पावस्थायाम् एव किमर्थं गृहं त्यक्त्वा अरण्यं गतवान् ?

१२. नारदेन ध्रुवाय कथिताः प्रारम्भिकाः उपदेशाः के ?

१३. ध्रुवः हरिं कथं सन्तुष्टं कृतवान् ?

## *रिक्तस्थानं पूरयन्तु*

१. सत्ययुगे ____________ नाम एकः कुशलः राजा आसीत् ।

२. तस्य ______________च पत्निद्वयम् आसीत्।

३. ध्रुवः तद्दृष्ट्वा उत्तमसदृशं पितृसुखं प्राप्तुम् ____________ ।

४. ध्रुवस्य प्रयासं दृष्ट्वा सुरुचिः अपि तं _____________।

५. सा पौरजनेभ्यः सर्वं वृत्तान्तं श्रुत्वा _____________।

६. सा सपत्न्याः वाक्यं ___________ अश्रुलोचना जाता ।

७. ध्रुवः मात्रा सञ्जल्पितम् ___________आत्मानं मनसा सन्नियम्य पितुः पुरात् निर्गतः ।

८. नारदः ध्रुवम् ____________ यत् बालेन सुखदुखयोः संतुष्टः कथं भवितव्यः एतत् एव तेन अभ्यासः करणीयः ।

९. बालध्रुवस्य एतादृशं निश्चयं दृष्ट्वा नारदः तस्य कृते जनन्या अभिहितः पन्थाः एव समीचीनः इति __________ ।

१०. _____________________अभयत्वं च ध्रुवस्य परमपदप्राप्तौ सहाय–काः आसन् ।

<u>*व्याकरण–विभागः*</u>

१. निम्नलिखितधातुरूपाणां मूलधातून् सम्यक्रूपेण अवलोकयन्तु वाक्यानि च रचयन्तु ।

इष्टवान् – [इष्]

ध्रुवः यत् **इष्टवान्** तत् प्राप्तवान् ।

तुष्टवान् –[तुष्]

भक्तः कृष्णकथां श्रुत्वा **तुष्टवान्** ।

उपरि दृष्ट्वा निम्नलिखितक्रियापदानाम् अपि प्रयोगं कुर्वन्तु ।

व्यथितवती [व्यथ्+क्तवतु+ङीष्], उपदिष्टवती [उप+दिश्+क्तवतु+ङीष्], आराधयतु [आ+राध्], घोषितवान् [घुष्+क्तवतु] ।

२. निम्नलिखितशब्दरूपाणां मूलशब्दान् सम्यक्रूपेण अवलोक्य वाक्यानि रचयन्तु ।
अपेक्षया – [अपेक्षा]
ज्ञानस्य **अपेक्षया** भक्तिः श्रेष्ठा ।
ध्रुवस्य :– [ध्रुव]
**ध्रुवस्य** मातुः नाम सुरूचिः अस्ति ।

उपरि दृष्ट्वा निम्नलिखितशब्दानाम् अपि प्रयोगं कुर्वन्तु ।

राज्ञः, कुक्षौ, स्थानात्, सुनीत्या, पुरात्, जनेभ्यः, जन्मभिः, उपदेशान्, पृष्ठेषु ।

३. क्तवतू–प्रत्ययः स्त्रीलिङ्गे :–
क). तिरष्कृतवती :– गोपी कृष्णदर्शनाय ग्रहं तिरष्कृतवती ।
ख). पठितवती :– मैत्रेयी वेदान् पठितवती ।
ग). उक्तवती :– सीता रामम् उक्तवती ।
घ). नीतवती :– चटका स्वपुत्राय अन्नं नीतवती ।
ङ). पाठितवती :– शिक्षिका छात्रान् पाठितवती ।
च). प्राप्तवती :– बुद्धिमती छात्रा पुरस्कारं प्राप्तवती ।
च). पृष्टवती :– गार्गी याज्ञवल्कं पृष्टवती ।

उपरि दृष्ट्वा निम्नलिखितशब्दानाम् अपि प्रयोगं कुर्वन्तु ।

गतवती, कृतवती, प्रक्षालितवती, प्राप्तवती, ग्रहीतवती, त्यक्तवती ।

४. आज्ञार्थक–प्रयोगः :–

क). भगवन्तं पूजयतु । भगवान् प्रसन्नः भविष्यति ।

भगवन्तं **पूजयन्तु**, भगवान् प्रसन्नः भविष्यति ।

ख). रामं क्रीडनार्थम् **आह्वयतु** ।

रामं क्रीडनार्थम् **आह्वयन्तु** ।

ग). सत्यं **वदतु** ।

सत्यं **वदन्तु** ।

घ). गुरोः सेवां सर्वदा **करोतु** ।

गुरोः सेवां सर्वदा **कुर्वन्तु** ।

ङ). पाठं सम्यक्तया **लिखतु** ।

पाठं सम्यक्तया **लिखन्तु** ।

च). यदा शिक्षकः कक्षायां प्रविशति तदा **उत्तिष्ठतु** ।

छ). यदा कश्चिद् असहाय भवति तदा तस्य सहायं **करोतु** ।

ज). भगवद्गीतां **पठतु** । पठनेन संशयः भवति चेत् गुरुं **पृच्छतु** ।

झ). जलं संशोध्य एव **पिबतु** ।

ञ). भागवतं प्रतिदिनं **श्रुणोतु** ।

उपरि दृष्ट्वा निम्नलिखितशब्दानाम् अपि प्रयोगं कुर्वन्तु ।

क्रीडतु, पिबन्तु, पठन्तु, प्रच्छन्तु, पश्यतु ,ददातु , प्रेषयतु, ।

वाक्यानि रचयन्तु यथा :–

[भवान्/सः/सा/रामः] [पठतु/खादतु/गच्छतु/क्रीडतु] ।

भवान् पठत ु। सः क्रीडतु । सा खादतु । सा पठतु ।

प्रश्नान् कुर्वन्तु यथा :–

अहम् –[पठानि/वदानि/गच्छानि/पिबानि/स्मरानि/नयानि/स्थापयानि/
उपविशामि] – किम् ?


अहं पठानि किम् ? अहं नयानि किम् ?

वयम् [पिबाम/गच्छाम/वदाम/नयाम/स्मराम] ।

॥ हरि ॐ तत्सत् ॥

तृतीयः अध्यायः

# गङ्गामाता



भारतवर्षे बहव्यः पुण्यशीलाः नद्यः प्रवहन्ति । तासु नदीषु गङ्गानदी श्रेष्ठा वर्तते । हिमालयशिखरात् अलकनन्दा नाम्नी गङ्गायाः एका मूलधारा निर्गता अस्ति । गोमुखात् भागीरथी नाम्नी गङ्गायाः एका अन्या धारा अपि निर्गच्छति । अलकनन्दायाः भागीरथ्या साकं देवप्रयागे मेलनेन तत्र गङ्गानदी प्रादुर्भवति । सा गङ्गा अनेकेषु प्रदेशेषु बङ्गादिप्रदेशेषु च प्रवहन्ती बङ्गोपसागरेण सह सम्मिलति । तस्याः मार्गे हरिद्वारं प्रयागः वाराणासी आदीनि तीर्थक्षेत्राणि स्थितानि सन्ति । कानपुरं पटनानगरं कोलकत्तादीनि महानगराणि अपि तस्याः मार्गे एव अवस्थितानि सन्ति । गङ्गायमुनयोः संगमः प्रयागक्षेत्रे भवति । तमषानदी गोमती घघरा गन्डकी कोशी आदयः नद्यः मार्गे गङ्गानद्या साकं सम्मिलन्ति । पकुरक्षेत्रे गङ्गायाः विभाजनं भवति । तस्याः एका धारा बंगदेशं प्रविश्य पद्मा इति नाम्नी प्रवहति । अन्या धारा मार्गे जलांगीनद्या सह मिलित्वा हुग्लीनदी इति नाम्नी प्रवहति ।


गङ्गातटस्थितेषु प्रदेशेषु चत्वारिंशत् कोट्याधिकाः जनाः निवसन्ति । कृषकाः गङ्गाजलेन शस्यानि उपजनयन्ति । जनाः गङ्गास्नानं गङ्गाजलपानं च कुर्वन्ति । भौतिकाः जनाः गङ्गानदी एका प्राकृतिकसर्जना अस्ति इति मन्यन्ते । वैदिकाः गङ्गामातरं देवीरुपेण पूजयन्ति तथा च स्नानकाले एवं प्रकारेण

स्तुन्वन्ति च।

*गङ्गा गङ्गेति यो ब्रूयात् योजनानां शतैरपि ।*
*मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥*

अस्य श्लोकस्य अयं भावः :
यः जनः शतयोजनदूरात् अपि गङ्गा गङ्गा इति कीर्त्तयति सः सर्वपापेभ्यः विमुच्य विष्णुलोकं प्राप्नोति ।

शास्त्रचक्षुषा तु सा विष्णुपत्नी एव । महाभारते सा भीष्मदेवस्य माता इति प्रसिद्धा । शास्त्रेषु गङ्गामातासम्बन्धीनि अनेकानि विवरणानि सन्ति । तेषु विवरणेषु निम्नलिखितविवरणं भागवते उल्लिखितम् अस्ति ।



एकदा वामनदेवः बलिमहाराजं पादत्रयं यावत् भूमिं याचितवान् । भवता याचिता भूमिः मत्तः गृह्यताम् इति बलिमहाराजः उक्तवान् । एकेन पदेन वामनदेवः त्रिलोकं नीतवान् । द्वितीयेन पदेन सः शेषब्रह्माण्डम् आच्छादितवान् । तदानीं तस्य नखेन्दुभिः सत्यलोकस्य द्युतिः अपि हता । ब्रह्मा एतत् सर्वं दृष्ट्वा स्वकमण्डलुजलेन प्रभुचरणं प्रक्षालितवान् । कमण्डलुमध्ये गुप्तरुपेण संस्थिता गङ्गा विष्णुचरणं संस्पर्श्य पूता अभवत् । तदारभ्य अधुना पर्यन्तं सा गङ्गा कृष्णकीर्तिं गायन्ती त्रिलोकं पुनाति ।

सांप्रतं तु तस्याः अवहेलना जाता अस्ति । नगरेभ्यः निर्गताः विषाक्तपदार्थाः शिल्पशालाभिः त्यक्तपदार्थाः च गङ्गां प्रदूषयन्ति । जनैः त्यक्तपदार्थाः यथा मलमूत्रादयः अपि तस्याः जलं प्रदूषयन्ति । संवेदनशीलैः

जनैः गङ्गा जलशुद्धिकरणाभियानं संचाल्यते । अस्माभिः अपि एतस्मिन् अभियाने भागः स्वीकरणीयः ।

* हरे कृष्ण !*

*प्रश्नोत्तर–विभागः*

१. अलकानन्दा कुतः उद्गच्छति ?

२. भागीरथी कुतः स्फुरति ?

३. गङ्गानद्याः मार्गे कानि तीर्थक्षेत्राणि स्थितानि सन्ति ?

४. गङ्गानद्याः मार्गे कानि नगराणि अवस्थितानि सन्ति ?

५. गङ्गातटस्थितेषु प्रदेशेषु कति जनाः निवसन्ति ?

६. वैदिकाः गङ्गां केन भावेन पूजयन्ति ?

७. महाभारते गङ्गायाः कीदृशी प्रसिध्दिः अस्ति ?

८. गङ्गा विष्णुचरणस्पर्शं कथं कृतवती ?

९. पूज्या गङ्गा अद्य कथम् अवहेलिता ?

१०. भवान् गङ्गाशुद्धिकरणस्य कृते किं करिष्यति? वर्णयतु ।

*रिक्तस्थानं पूरयन्तु*

१. हिमालयशिखरात्________ नाम्नी गङ्गायाः एका मूलधारा निर्गता अस्ति ।

२. गङ्गायमुनयोः संगमः ____भवति ।

३. एकदा वामनदेवः_______ पादत्रयं यावत् भूमिं याचितवान् ।

४. गङ्गातटस्थितेषु प्रदेशेषु __________जनाः निवसन्ति ।

५. गङ्गा गङ्गेति यो ___योजनानां शतैरपि ।

_____ सर्वपापेभ्यो विष्णुलोकं स _____॥

*व्याकरण–विभागः*

१. निम्नलिखितधातुरूपाणां मूलधातून् सम्यक्रूपेण अवलोक्य वाक्यानि रचयन्तु ।

प्रक्षालितवान् – [प्र+क्षल्+क्तवतु]

सः वस्त्रान् **प्रक्षालितवान्** ।

याचितवान् :– [याच्+क्तवतु]

भिक्षुकः राजानं **याचितवान्** ।

उपरि दृष्ट्वा निम्नलिखितक्रियापदानाम् अपि प्रयोगं कुर्वन्तु ।

प्रवहन्ति [प्र+वह्], निर्गच्छति [निर्+गम्], सम्मिलति [सम्+मिल्], प्रवहति [प्र+वह्], निवसन्ति [नि+वस्], उपजनयन्ति [उप+जन्+णिच्], प्राप्नोति [प्र+आप्] ।

२. निम्नलिखितशब्दरूपाणां मूलशब्दान् सम्यक्रूपेण अवलोक्य वाक्यानि रचयन्तु ।

शस्यानि – [शस्य]

कृषकाः **शस्यानि** उपजनयन्ति ।

गङ्गायाः – [गङ्गा]

**गङ्गायाः** जलेन स्नानं करणीयम् ।

उपरि दृष्ट्वा निम्नलिखितशब्दानाम् अपि प्रयोगं कुर्वन्तु ।

बहव्यः, शिखरात्, नाम्नी, गोमुखात् ।

३. सङ्ख्या–विशेषणम्

क). गङ्गातटस्थितेषु प्रदेशेषु **चत्वारिंशत् कोव्याधिकजनाः** वसन्ति ।

ख). सप्तकक्षायां **त्रिंशत् छात्राः** अध्ययनं कुर्वन्ति ।

ग). गुरुकुले **पञ्चाशताधिक द्विशतं** छात्राः पठन्ति ।

घ). श्रीकृष्णस्य **षोडशसहस्रं** भार्याः आसन् ।

ङ). गुरुकुले **पञ्चत्रिन्शत्** अध्यापकाः सन्ति ।

च). अष्टकक्षायां **त्रयः** छात्राः पटवः सन्ति ।

छ). प्रश्नः :– गुरुकुले **कति** छात्राः सन्ति ?

उत्तरम् :– गुरुकुले **पञ्चाशताधिक द्विशतं** छात्राः सन्ति ।

४. ल्यप् प्रत्ययः

क). परित्यज्य :– परित्यागं कृत्वा

ख). उपदिश्य :– उपदेशं कृत्वा

ग). विमुच्य :– विमोचनं कृत्वा

घ). आनीय :– आनयनं कृत्वा

ङ). संपूज्य :– पूजनं कृत्वा

च). संस्थाप्य :– संस्थापनां कृत्वा

प्राप्य, समाप्य, निहत्य, आहूय, विकथ्य, प्रदाय, संयोज्य।

प्रयोगः यथा :–

क). परित्यज्य :– श्रीकृष्णः उक्तवान् यत् सर्वधर्मान् **परित्यज्य** मां शरणम् आगच्छतु ।

ख). उपदिश्य :– गुरुः शिष्यम् **उपदिश्य** वनं गतः ।

ग). विमुच्य :– यः गङ्गायां स्नानं करोति सः पापेभ्यः **विमुच्य** वैकुण्ठं प्राप्नोति ।

घ). निहत्य :– श्रीरामः रावणं **निहत्य** लङ्काराज्यं विभीषणाय दत्तवान् ।

ङ). समाप्य :– गुरुकुलछात्रः विद्यां **समाप्य** ग्रहं याति ।

च). संस्थाप्य :– प्रभुपादः इस्कॉन् सङ्घं **संस्थाप्य** पतितानाम् अपि उद्धारं कृतवान् ।

च). प्राप्य :– मूर्खः धनं **प्राप्य** मत्तः भवति ।

७. शब्दपरिचयः

सः/भवान्/अहम् – कलाकारः ।

'कलाकारः' स्थाने निम्नलिखितशब्दानां प्रयोगं कृत्वा वाक्यानि रचयतु ।

चित्रकारः, नाट्यकारः, स्वर्णकारः, पत्रकारः, लोहकारः, यन्त्रकारः, मणिकारः, शिल्पकारः, कोषकारः, संविदाकारः, कुम्भकारः, मूर्तिकारः, चर्मकारः, शल्– यकारः, विद्युत्कारः, भाष्यकारः

॥ हरि ॐ तत्सत् ॥

चतुर्थः अध्यायः

# देवर्षिः नारदः



कृष्णभक्तः नारदः देवर्षीणां श्रेष्ठः । सः द्वादशमहाजनेषु श्रेष्ठतमः । तस्य शिष्येषु व्यासदेवः प्रह्लादः ध्रुवः प्रियव्रतादयः अग्रगण्याः । सः वीणां वादयन् हरिकीर्तनं गायन् च निरन्तरं सर्वत्र कृष्णभक्तिं प्रसारयति ।

परन्तु सः नारदः पूर्वजन्मनि एकः दासीपुत्रः आसीत् । एकदा भक्तियोगिनः साधवः चातुर्मास्यव्रतं पालयितुं नारदस्य मातुः ग्रामम् आगताः आगतवन्तः । नारदस्य माता तेषां शुश्रूषां कृतवती । सा स्वपुत्रं नारदम् अपि योगिनां शुश्रूषायां नियोजितवती । तस्य बालस्य क्रीडनकेषु बालचपलतासु च रुचिः न आसीत् । अतः मुनयः अनुवर्तिनि शुश्रूषमाणे अल्पभाषिणि बालके कृपां कृतवन्तः । सः बालकः मुनीनाम् अनुमत्या तेषाम् उच्छिष्टं गृह्णाति स्म । तस्मात् सः बालः सर्वपापेभ्यः मुक्तः विशुद्धचित्तसंपन्नः च जातः । कृष्णभक्तौ तस्य आत्माभिरुचिः जाता । तदानीं तेन तत्र नित्यं मुनिभिः गीताः मनोहराः कृष्णकथाः श्रुताः । नियमेन कृष्णकथायाः श्रवणेन बालकस्य हृदि अन्तःस्थितानि अभद्राणि नष्टानि जा–तानि ।

मुनयः व्रतं समाप्य तस्मै बालकाय भक्तिज्ञानं च प्रदाय तस्मात् स्थानात् निर्गताः (निर्गतवन्तः) । एकदा तस्य माता पथि कालप्रेरितेन सर्पेण दष्टा ।

कृष्णस्य अनुग्रहम् इति मन्यमानः सः बालः उत्तरादिशां प्रतिगतवान् । सः मार्गे गम्यमानः स्फीतान् जनपदान् नगरान् ग्रामान् आकरान् वाटिकाः वनानि उपवनानि च दृष्टवान् । सः चित्रधातुयुक्तान् विचित्रपर्वतान् जलाशयान् सुरसेविताः नलिनीः च दृष्टवान् (अवलोकितवान्)। सः बालः हिंस्रपशुभिः विषाक्तसर्पैः च निसेवितं विशालं घोरं वनम् एकाकी एव अतिक्रान्ततवान् । परन्तु सः बालः मार्गे दृष्टैः ऐश्वर्यैः हिंस्रपशुभयेन वा प्रभावितः न अभवत् ।

परिश्रान्तः बुभुक्षितः सः नद्यां स्नात्वा तस्याः जलं पीत्वा च गतश्रमः जातः । सः तस्मिन् निर्जने अरण्ये पिप्पलस्य अधः तिष्ठन् आत्मनि संस्थितं परमात्मानम् अचिन्तयत् । यदा सः हरेः चरणकमलं ध्यायमानः आसीत् तदा तस्य हृदि हरिः स्वयं प्रकटः जातः । हरिदर्शनेन तस्य अङ्गानि पुलकितानि जातानि आसन् । परन्तु मुहुर्तेन एव सः हरिः अप्रकटः जातः । प्रेमातिशयेन व्याकुलः बालः हरिणा आकाशवाण्या संबोधितः यत् एतस्मिन् जन्मनि भवान् मां द्रष्टुं न शक्नोति । परञ्च भवान् भक्तियोगबलेन मां शीघ्रम् एव प्राप्स्यति । तुष्टमना सः बालः कृष्णनामानि गायन् स्मरन् च पाञ्चभौतिकशरीरं त्यक्तवान् ।

सः बालः हरेः इच्छया एतस्मिन् कल्पे ब्रह्मपुत्ररूपेण नारदनाम्ना प्रसिद्धः जातः । सः कृष्णभावनाभावितः देवर्षिः नारदः लोकत्रयस्य अन्तः बहिः च भ्रममाणः पतितान् जीवान् उद्धर्तुं पर्यटति । सः हरिप्रियः निर्मत्सरः नारदः कृष्णभक्तानां प्रियः सर्वेषां च प्रियः ।

* हरे कृष्ण *

## *<u>प्रश्नोत्तर–विभागः</u>*

१. नारदः केषु श्रेष्ठतमः ?

२. सः किं कुर्वन् कृष्णभक्तिं प्रसारयति ?

३. नारदः पूर्वजन्मनि कः आसीत् ?

४. एकदा चातुर्मास्यव्रतं पालयितुं के आगताः ?

५. मुनयः व्रतं समाप्य तस्मै बालकाय किं प्रदाय निर्गताः ?

६. सः मार्गे किं किं दृष्टवान् ?

७. तस्य हृदि कः प्रकटः जातः ?

८. तस्य माता केन दष्टा ?

९. भवान् नारदस्य चरित्रात् कां शिक्षां प्राप्नोति ? वर्ण्यतां ।

१०. एतस्य अध्यायस्य सारांशं लिखतु ।

११. नारदस्य प्रमुखाः प्रसिध्दाः शिष्याः के ?

१२. नारदः स्वपूर्वजन्मनि साधुसङ्गं कथं प्रप्तवान् ? सङ्क्षिप्तरूपेण विवि–च्यताम् ।

१३. नारदः स्वपूर्वजन्मनि भगवतः ध्यानं कथं कृतवान् ?

## *रिक्त–स्थानं पूरयन्तु*

१. तस्य शिष्येषु व्यासदेवः _________प्रियव्रतादयः अग्रगण्याः ।

२. सः वीणां ____हरिकीर्तनं ____च निरन्तरं सर्वत्र कृष्णभक्तिं प्रसारयति ।

३. परन्तु सः नारदः पूर्वजन्मनि एकः _____आसीत् ।

४. सः बालकः मुनीनाम् अनुमत्या तेषाम्____ गृह्णाति स्म ।

५. सः हरिप्रियः _____नारदः कृष्णभक्तानां प्रियः सर्वेषां च प्रियः ।

## *व्याकरण–विभगः*

१. निम्नलिखितधातुरूपाणां मूलधातून् सम्यक्रूपेण अवलोक्य वाक्यानि रचयन्तु ।

प्रसारयति – [प्र+सृ]
भक्तः कृष्णभक्तिं प्रसारयति ।
आसीत् – [अस्]
सः गृहे एव आसीत् ।

उपरि दृष्ट्वा निम्नलिखितक्रियापदानाम् अपि प्रयोगं कुर्वन्तु ।

निर्गताः [निर्+गम्+क्त], जातानि [ज्ञा+क्त], शक्नोति [शक्], अचिन्तयत् [चिन्त्], त्यक्तवान् [त्यज+क्तवतु], आसन् [अस्] ।

२. निम्नलिखितशब्दरूपाणां मूलशब्दान् सम्यक्रूपेण अवलोक्य वाक्यानि रचयन्तु ।
हृदि – [हृद्]
हरिः भक्तस्य **हृदि** प्रकटयति ।
पिप्पलस्य – [पिप्पल]
सः **पिप्पलस्य** अधः तिष्ठति ।

उपरि दृष्ट्वा निम्नलिखितशब्दानाम् अपि प्रयोगं कुर्वन्तु ।

अङ्गानि, पुलकितानि, आकाशवाण्या, गीताः, मुहूर्तेन ।

६. तृतीयाविभक्तिप्रयोगः–
क) करण :– श्रीलप्रभुपादः कृष्णनामबलेन प्रचारं कृतवान् । अहं विद्यालयं यानेन आयामि । अहं कन्दुकेन क्रीडामि । सः जलेन मुखं प्रक्षालयति ।
ख) कर्मवाच्यः :– अजामिलेन पापानि नष्टानि । तेन मन्दिरं गतम् ।
ग) सहयोगे तृतीया – श्रीकृष्णेन सह राधा विलसाति। रामेण सह सीता वनं गतवती ।
घ) सदृशः :– प्रभुपादेन सदृशः प्रचारकः न भूतः न च भविष्यति।

ङ) हेतु :– साधवः वृन्दावने केन हेतुना वसन्ति ?

च) विना :– भक्तिं विना जीवनं व्यर्थम् एव ।

च) अलम् :– अलं प्रजल्पेन, पानेन, कथनेन ।

ज) लक्षण :– स्वरूपेण तु कृष्णभक्तः प्रतीयते। मुखेन तु चन्द्रः दृश्यते ।

झ) कालः फलप्राप्तिः :– अहं पञ्चभिः वर्षैः भागवतं पठितवान्।

ञ) विकृति :– नेत्रेण/अक्ष्णा/चक्षुषा काणः, कर्णेन बधिरः, पादेन खञ्जः ।

॥ हरि ॐ तत्सत् ॥

पञ्चमः अध्यायः

## मत्स्यावतारः



*यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।*
*अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥*

*परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।*
*धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥*
( भगवद्गीता ४.७–८ )

यदा यदा हि धर्मस्य ग्लानिः भवति तदा तदा साधूनां परित्राणाय दुष्कृतिनां विनाशाय च श्रीकृष्णः युगे युगे भौतिके जगति अवतरति । एतेषु अवतारेषु मत्स्यावतारः अन्यतमः । भगवान् श्रीकृष्णः मत्स्यरूपं प्रतियुगं गृह्णाति । यदा त्रिलोकाः पूर्वब्राह्मकल्पान्ते प्रलयपयोधिजले निमग्नाः आसन् तदा हयग्रीवः ब्रह्ममुखात् निःसृतान् वेदान् अपहृतवान् । भगवान् हरिः तत् सर्वं ज्ञात्वा मत्स्यरूपं धृतवान् हयग्रीवं च हत्वा वेदान् उद्धृतवान् ।



श्रीहरिः चाक्षुषमन्वन्तरे अपि पुनः मत्स्यरूपं गृहीतवान् । तस्मिन् काले सत्यव्रतः नाम्ना एकः राजा आसीत् । सः द्रविडदेशीयः राजा हरिभक्तः प्रजावत्सलः च आसीत् । एकदा सः राजा कृतमालानद्यां स्नात्वा जलतर्पणं कुर्वन् आसीत् । तदा तस्य अञ्जलौ एका शफरी प्रकटिता जाता (प्रकटितवती) । राजा

अञ्जलिगतां शफरीं दृष्ट्वा तां नदीतोये क्षिप्तवान् । एवं क्षिप्ता सा शफरी तं महाकारुणिकं नृपम् इदम् उक्तवती । हे दीनवत्सल ! भवान् भीतां माम् एतस्मिन् सरित्जले किमर्थं निक्षिपति ? अत्र घातकाः ज्ञातयः मां शीघ्रं हनिष्यन्ति । कृपया आविष्टः राजा तां शफरीं कमण्डलुजले निधाय राज–प्रासादम् आनीतवान् । तत्र सा शफरी एकरात्रेण एव वर्धमाना कलशाकारं यावत् धृतवती ।

राजा विशाले जलाशये मां निक्षिपतु इति तस्याः प्रार्थनां स्वीकृतवान् । तथा च राजा तां शफरीं कलशात् आदाय लघुकुण्डे क्षिप्तवान् । सा लघुकुण्डे क्षिप्ता शफरी मुहूर्तेन हस्तत्रयं वृद्धवती । 'एषः जलाशयः ममकृते सुख–करः न, मह्यम् एकः विशालः जलाशयः दीयताम्' इति शरणंगता सा शफरी नृपं प्रार्थितवती । ततः राज्ञा सरोवरे क्षिप्ता सा शफरी क्षणेन सरोवरम् आवृत्य महामीनशरीरं धृतवती । राजा तं मत्स्यं सरोवरात् आदाय ह्रदमध्ये स्थापितवान् । राज्ञा सत्यव्रतेन ह्रदाकारवर्धितः सः मत्स्यः समुद्रे एव क्षिप्तः । मकरादयः अत्र मां खादिष्यन्ति इति तस्य शतयोजनदेहधारीमत्स्यस्य अनुनयं श्रुत्वा राजा आश्चर्यचकितः जातः ।



सः सत्यव्रतः भगवतः कृपया दिव्यं ज्ञानं लब्धवान् । सः राजा श्रीहरेः एषः मत्स्यावतारः इति विज्ञाय तम् आराधितवान् । भगवान् मत्स्यः राज्ञः आराधनात् प्रसन्नः जातः । मत्स्यभगवान् राजानम् एतत् कथितवान् । हे राजन् ! अद्यतनात् सप्तमे दिवसे त्रैलोक्यं प्रलयजले निमग्नं भविष्यति । तदा मम आत्ममायया काचित् विशाला नौका प्रलयजले प्रकटीभविष्यति । भवान् सप्तर्षिभिः साकम् औषधीः वेदादीन् च नीत्वा तस्यां नौकायां निर्भयः तिष्ठतु । अहं तस्मिन् काले

प्रकटीभूय प्रलयजले नौकां स्थिरीकरिष्यामि । एतत् उक्त्वा भगवान् मत्स्यः अप्रकटः जातः ।

भगवतः मत्स्यस्य वचनानुसारेण प्रलयः अभवत् । तत्र एका विशाला नौका च प्रकटा जाता । राजा सप्तर्षिभिः औषधिभिः वेदादिभिः सह नौकायाः आश्रयं ग्रहीतवान् । मत्स्यभगवान् तत्र प्रकटीभूय नौकां स्थिरीकृत्य च सत्यव्रतं परमसत्यम् उपदिष्टवान् । राजा सत्यव्रतः भगवतः मत्स्यस्य करुणया जीवनमुक्तः अभवत् तथा च एतस्मिन् मन्वन्तरे विवस्वतः पुत्ररूपेण जन्म लब्धवान् । अतः एषः मन्वन्तरः वैवस्वतः इति नाम्ना ज्ञायते । मत्स्यावतारस्य एषा लीला अद्भुता रहस्यमयी च ।

* हरे कृष्ण !*

## *प्रश्नोत्तरः विभागः*

१. श्रीकृष्णः भौतिकजगति किमर्थम् अवतरति ?

२. ब्रह्ममुखतः निःसृतान् वेदान् कः अपहृतवान्?

३. चाक्षुषमन्वन्तरे द्रविडदेशस्य राजा कः आसीत् ?

४. राजा शफरीं राजप्रासादं किमर्थम् आनीतवान् ?

५. राजा शफरीम् लघुकुण्डे किमर्थं क्षिप्तवान् ?

६. राजा मत्स्यं किमर्थम् आराधितवान् ?

७. एतस्य मन्वन्तरस्य नाम किम् ?

८. मत्स्य अवतारस्य लीला कीदृशी वर्तते ?

९. भगवान् मत्स्यरूपेण कुत्र आविर्भूतः ?

१०. राजा सत्यव्रतः 'एषः मत्स्यः भगवतः एकः अवतारः' इति कथं ज्ञा–तवान् ?

## *रिक्त–स्थानं पूरयन्तु*

१. _____ब्रह्ममुखात् निःसृतान् वेदान् _____ ।

२. श्रीहरिः ______अपि पुनः मत्स्यरूपं _____ ।

३. तस्मिन् काले _____नाम्ना एकः राजा आसीत् ।

४. मकरादयः अत्र मां खादिष्यन्ति इति तस्य __________अनुनयं श्रुत्वा राजा आश्चर्यचकितः जातः ।

५. अतः एषः मन्वन्तरः ______इति नाम्ना ज्ञायते ।

६. सः सत्यव्रतः _____कृपया दिव्यं ज्ञानं _____ ।

७. राजा _____औषधिभिः वेदादिभिः सह _____आश्रयं ग्रहीतवान् ।

## *व्याकरणः–विभागः*

१. निम्नलिखितधातुरूपाणां मूलधातून् सम्यक्रूपेण अवलोकयन्तु वाक्यानि च रचयन्तु ।

अवतरति – [अव+तृ]

श्रीकृष्णः मत्स्यरूपे प्रतियुगम् **अवतरति** ।

अपहृतवान् – [अप+हृ+क्तवतु]

दुष्टः रावणः सीतां **अपहृतवान्** ।

उपरि दृष्ट्वा निम्नलिखितक्रियापदानाम् अपि प्रयोगं कुर्वन्तु ।

उद्धृतवान् [उत्+धृ], गृहीतवान् [गृह्], क्षिप्तवान् [क्षिप्], निक्षिपति [नि+क्षिप्], हनिष्यन्ति [हन्], दीयताम् [दा], खादिष्यन्ति [खाद्], तिष्ठतु [स्था] ।

२. निम्नलिखितशब्दरूपाणां मूलशब्दान् सम्यक्रूपेण अवलोकयन्तु वाक्यानि

च रचयन्तु ।

प्रासादम् – [प्रासाद]
राजा स्व **प्रासादं** गतवान् ।
अद्यतनात् – [अद्यतन]
अद्यतनात् द्वितीये दिवसे अहं गमिष्यामि ।

उपरि दृष्ट्वा निम्नलिखितशब्दानाम् अपि प्रयोगं कुर्वन्तु ।

अवतारेषु, वेदान्, मन्वन्तरे, तोये, नृपम्, नौः ।

३. अव्ययानां प्रयोगः :–
क) अद्य :– अद्य अष्टमी अस्ति । अद्य रविवासरः ।
ख) ह्यः :– ह्यः सप्तमी आसीत् । ह्यः शनिवासरः ।
ग) परह्यः :– प्रह्यः षष्ठी आसीत् । परह्यः शुक्रवासरः ।
घ) प्रपरह्यः :– प्रपरह्यः पञ्चमी आसीत् । प्रपरह्यः गुरुवासरः ।
ङ) श्वः :– श्वः नवमी भविष्यति । श्वः सोमवासरः ।
च) परश्वः :– परश्वः दशमी भविष्यति । परश्वः मङ्गलवासरः ।
च) प्रपरश्वः :– प्रपरश्वः एकादशी भविष्यति । प्रपरश्वः बुधवासरः ।

४. भविष्यत्कालिक प्रयोगः :–
अ) प्रथमपुरुषः :–
एकवचनम् :– [एषः/सः/भवान्/गोपालः/गोपी] [वृन्दावनं गमिष्यति/गङ्गाजलं पास्यति/कथां श्रोष्यति/पाठं स्मरिष्यति]।
बहुवचनम् :– [एते/ते/भवत्यः/गोपालाः/गोप्यः] [वृन्दावनं गमिष्यन्ति/गङ्गाजलं पास्यन्ति/कथां श्रोष्यन्ति/पाठं स्मरिष्यन्ति]।

प्रयोगः यथा :–

क) एषः वृन्दावनं गमिष्यति । एते वृन्दावनं गमिष्यन्ति ।

ख) एषः गङ्गाजलं पास्यति । एते गङ्गाजलं पास्यन्ति ।

ग) एषः कथां श्रोष्यति । एते कथां श्रोष्यन्ति ।

घ) एषः पाठं स्मरिष्यति । एते पाठं स्मरिष्यन्ति ।

ङ) सः वृन्दावनं गमिष्यति । ते वृन्दावनं गमिष्यन्ति ।

च) सः गङ्गाजलं पास्यति । ते गङ्गाजलं पास्यन्ति ।

च) सः कथां श्रोष्यति । ते कथां श्रोष्यन्ति ।

ज) सः पाठं स्मरिष्यति । ते पाठं स्मरिष्यन्ति ।

झ) भवान् वृन्दावनं गमिष्यति । भवन्तः वृन्दावनं गमिष्यन्ति ।

ञ) भवान् गङ्गाजलं पास्यति । भवन्तः गङ्गाजलं पास्यन्ति ।

ट) भवान् कथां श्रोष्यति । भवन्तः कथां श्रोष्यन्ति ।

ठ) भवान् पाठं स्मरिष्यति । भवन्तः पाठं स्मरिष्यन्ति ।

ड) गोपालः वृन्दावनं गमिष्यति । गोपालाः वृन्दावनं गमिष्यन्ति ।

ढ) गोपालः गङ्गाजलं पास्यति । गोपालाः गङ्गाजलं पास्यन्ति ।

ण) गोपालः कथां श्रोष्यति । गोपालाः कथां श्रोष्यन्ति ।

त) गोपालः पाठं स्मरिष्यति । गोपालाः पाठं स्मरिष्यन्ति ।

थ) गोपी वृन्दावनं गमिष्यति । गोप्यः वृन्दावनं गमिष्यन्ति ।

द) गोपी गङ्गाजलं पास्यति । गोप्यः गङ्गाजलं पास्यन्ति ।

ध) गोपी कथां श्रोष्यति । गोप्यः कथां श्रोष्यन्ति ।

न) गोपी पाठं स्मरिष्यति । गोप्यः पाठं स्मरिष्यन्ति ।

आ) उत्तम पुरुषः :–

अहम् [वृन्दावनं गमिष्यामि/गङ्गाजलं पास्यामि/कथां श्रोष्यामि/पाठं स्मरि–ष्यामि/वित्तकोषात् धनम् आनेष्यामि] ।

वयम् [वृन्दावनं गमिष्यामः/गङ्गाजलं पास्यामः/कथां श्रोष्यामः/पाठं स्मरि–ष्यामः/वित्तकोषात् धनम् आनेष्यामः] ।

प्रयोगः यथा :–

क) अहं वृन्दावनं गमिष्यामि । वयं वृन्दावनं गमिष्यामः ।
ख) अहं गङ्गाजलं पास्यामि । वयं गङ्गाजलं पास्यामः ।
ग) अहं कथां श्रोष्यामि । वयं कथां श्रोष्यामः ।
घ) अहं पाठं स्मरिष्यामि । वयं पाठं स्मरिष्यामः ।
ङ) अहं वित्तकोषात् धनम् आनेष्यामि । वयं वित्तकोषात् धनम् आनेष्यामः ।

## *अभ्यासं कुर्वन्तु*

एकवचनम् :–
[सः/एषः/गोपी/गोपालः] [वदिष्यति, लेखिष्यति, गमिष्यति, प्रक्षालयिष्यति, धावनं करिष्यति, स्थास्यति, स्थापयिष्यति, क्रीडिष्यति, रोदनं करिष्यति, शयनं करिष्यति, गास्यति, हनिष्यति, पठिष्यति, प्राप्स्यति, आगमिष्यति]

बहुवचनम् :–
[ते/एते/गोप्यः/गोपालाः] [वदिष्यन्ति, लेखिष्यन्ति, गमिष्यन्ति, प्रक्षालयिष्यन्ति, धावनं करिष्यन्ति, स्थास्यन्ति, स्थापयिष्यन्ति, क्रीडिष्यन्ति, रोदनं करिष्यन्ति, शयनं करिष्यन्ति, गास्यन्ति, हनिष्यन्ति, पठिष्यन्ति, प्राप्स्यन्ति, आगमिष्यन्ति]

यथा :– अहं वदिष्यामि । वयं वदिष्यामः ।

॥ हरि ॐ तत्सत् ॥

षष्ठः अध्यायः

# कथोपकथनम् – १

( घण्टानादः जातः । भक्तिवेदान्तगुरुकुले एकवादने प्रसादं ग्रहीतुं सर्वे छात्राः एकत्रीऽभवन् । )

माधवः – शीघ्रं चलतु । (माधवः श्यामं वदति )

श्यामः – भोः किमर्थं शीघ्रं करोति ? आनन्देन चलामः ।

माधवः – अहम् अतीव बुभुक्षितः अस्मि । उदरे मूषकाः इतस्ततः भ्रमन्ति (कूर्दन्ति ) ।

श्यामः – चलतु । चलतु ।

( प्रसादकक्षे गोपालः रामस्य समीपं प्रसादं ग्रहीतुम् उपविष्टः अस्ति । तदानीं प्रसादपरिवेषणस्य प्रारम्भः न जातः । मोहनः परिवेषणस्य दायित्वं निर्वहति । )



गोपालः – राम ! अद्य प्रसादे किं किं पक्वम् अस्ति इति मोहनं पृच्छतु ?

रामः – (मोहनं पृष्ट्वा) अद्य सामान्यमेव अस्ति । रोटिका, शाकं, पर्पटा, शदः अन्नं च ।



गोपालः – मिष्टान्ने किम् अस्ति ?
रामः – तत् तु अहं न पृष्टवान् । मोहन ! मिष्टान्ने किम् अस्ति ?

मोहनः – (रामगोपालौ दृष्ट्वा) गोपालस्य रोचकानि रसगोलकानि अद्यतन्यां व्यञ्जनसूच्यां सन्ति ।
गोपालः – (प्रसन्नचित्तेन वदति) भो ! भवान् स्मरति खलु । गतरविवासरे मिष्टान्ने पायसं कुण्डलिकाः सन्देशाः च पक्वाः आसन् ।

रामः – अलं वदनेन । मह्यं मिष्टान्नं न रोचते ।

( परिवेषणं प्रारम्भं जातम् (अभवत्) । )



गोपालः – पश्यतु । भवतः प्रियं शाकप्रसादम् ।

रामः – आम् ! अद्य प्रसादम् अतीव स्वादिष्टं पक्वम् अस्ति ।

गोपालः – भवान् जानाति वा ? मम शिक्षकेन अद्य विज्ञाने दृष्टिविद्या पाठिता । अतः एव अहं बहु श्रान्तः जातः । तस्मात् अहं बुभुक्षितः अभवम् । परन्तु

मिष्टान्नानि पर्याप्तानि न सन्ति ।

रामः – मम शिक्षकः अपि अद्य गणितं कारितवान् । अतीव क्लिष्टम् आसीत् । किन्तु अहं वारं वारम् अभ्यासं कृत्वा सिद्धं कृतवान् । ममापि तीव्रा बुभुक्षा आसीत् । ममकृते तु अद्य प्रसादम् अतीव स्वादिष्टं पर्याप्तं च अस्ति ।

रामः – अस्माकं प्रसादकक्षे निरन्तरं हरेकृष्णमहामन्त्रस्य ध्वनिः गुञ्जायमानः भवति । तस्मात् अपि प्रसादसेवने आनन्दः स्फुरति ।

गोपालः – भवान् भोजनप्रसादयोः कः भेदः इति जानाति वा ?

रामः – आम् ! अहम् जानामि ।

गोपालः – तर्हि कथ्यताम् ।

रामः – प्रसादग्रहणेन कृष्णकृपा मिलति पापस्य च क्षयं भवति ।

गोपालः – प्रसादस्य कः अर्थः भवति ?

रामः – प्र इत्युक्ते प्रभुः, सा इत्युक्ते साक्षात्, द इत्युक्ते दर्शनम्, सम्पूर्णस्य अर्थः भवति – प्रभोः साक्षात् दर्शनम् इति । अतः एव सर्वैः छात्रैः प्रसादं न क्षेपणीयम् ।

गोपालः – किमर्थं न क्षेपणीयम् ?

रामः – कृष्णप्रसादं कृष्णात् भिन्नं न भवति ।

( रामस्य उत्तरं श्रुत्वा समीपे उपविष्टः वासुदेवः पृच्छति )

वासुदेवः – भवता प्रसादस्य व्याख्या समीचीना कृता । अधुना साधारण–भोजनविषयेऽपि व्याख्यानं करोतु ।

( एवं वासुदेवस्य प्रश्नं श्रुत्वा अन्यः विद्वान् छात्रः जनार्दनः वदति । )

जनार्दनः – भोजनम् इत्युक्ते जीवनरक्षणार्थे उदरपूर्तिनिमित्तं साधारणम् अन्नम् । तत् अन्नं कृष्णार्पणं विना पापस्य स्वरूपम् एव भवति । "भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्" गीतायां भगवतापि उक्तम्।

वासुदेवः – प्रसादेन कृष्णकृपा प्राप्यते इति एतत् तु अहं ज्ञातवान् । अधुना वैज्ञानिकदृष्ट्यापि विविच्यताम् । श्रुतिरपि अस्ति – “आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः” .

जनार्दनः – श्रूयताम्, अन्नस्य त्रयः भागाः भवन्ति । अन्नस्य स्थूलभागः मलरूपेण बहिः आगच्छति । एकः भागः वीर्यरूपेण अन्तः एव तिष्ठति । तृतीयेन भागेन अतिसूक्ष्मेण मनः सम्भवति । अतएव यथा अन्नं भवति तथा मनः भवति ।

रामः – भवान् उत्तमरीत्या वर्णनं कृतवान् । प्रसादस्य सेवनमात्रेण मनः शुद्धं भवति ।

गोपालः – अहं भवतां व्याख्यानं श्रण्वन् अधिकं भुक्तवान् । अहं चिन्तयामि अत्रैव शयनं कुर्याम् । परन्तु अग्रिमः हिन्दी विषयस्य कालांशः अस्ति ।

रामः – अहमपि अद्य अधिकं खादितवान् । अहो ! उत्थातुमेव न शक्नोमि । कक्षां कथं यास्यामि ? इतः गत्वा शयनं करिष्यामि ।

गोपालः – राम ! भवतः प्रसादज्ञानं तु सम्यक् अस्ति परन्तु कालांशे

अनुपस्थितिः उचिता नास्ति ।

रामः – सत्यम् एव उक्तम् । चल्यतां । अहम् अपि कक्षाम् एव आगच्छामि ।

* हरे कृष्ण !*

## *प्रश्नोत्तर–विभागः*

१. माधवः किमर्थं शीघ्रं करोति ?

२. गोपालः किमर्थं श्रान्तः जातः ?

३. प्रसादकक्षे निरन्तरं कस्य ध्वनिः गुञ्जायमानः भवति ?

४. गोपालस्य भोजनप्रसादयोः विषये प्रश्नं श्रुत्वा रामः किम् उत्तरं ददाति ?

५. प्रसादस्य कः अर्थः भवति तथा प्रसादं किमर्थं न क्षेपणीयम्?

६. कृष्णार्पणं विना अन्नं कस्य स्वरूपं भवति ?

७. कृष्णप्रसादेन कृष्णकृपा कथं प्राप्यते ? एषः विषयः विस्तारेण विविच्य–ताम् ।

८. रामः अधिकं भोजनं खादित्वा किं वदति ?

९. गोपालः रामाय कीदृशं परामर्शं ददाति ?

१०. प्रसादे किं किं पक्वम् आसीत् ?

११. कस्मै किम् अधिकं रोचते ?

१२. प्रसादात् पूर्वस्मिन् कालांशे भवद्भिः किं किंम् अधीतम् ? वर्णयन्तु ।

१३. प्रसादपरिवेषणस्य दायित्वं कः निर्वहति ?

१४. रामः प्रसादं खादित्वा किम् उक्तवान् ?

॥ हरि ॐ तत्सत् ॥

सप्तमः अध्यायः

## कथोपकथनम् – २ ( वृन्दावनस्य बालकृष्णः )



मातायशोदा – उत्तिष्ठ , उत्तिष्ठ । कृष्ण !

श्रीकृष्णः – न ,न ! अहं न उत्थास्यामि ।

यशोदा – उत्तिष्ठ । पश्य । मया तवकृते नवनीतम् आ– नीतम् ।

श्रीकृष्णः – दीयताम् । दीयताम् । उत्तिष्ठामि ।

यशोदा – न, पूर्वं दन्तधावनं क्रियताम् । तदा दास्यामि ।

श्रीकृष्णः – अम्बे ! मम दन्तकूर्चः कुत्र अस्ति ? दन्तफेनः अपि ।

यशोदा – शय्यातः स्नानगृहम् आगच्छतु, ददामि ।

श्रीकृष्णः – आगच्छामि, मम कृते जलम् अपि आनीयताम् ।

यशोदा – भवान् जलं पातयिष्यति । मुखं दर्शयतु, अहं प्रक्षालयामि ।

श्रीकृष्णः – जनकः कुत्र अस्ति ?

यशोदा – तवजनकः कंसाय करं दातुं मथुराम् अगच्छत् (गतवान्) ।

श्रीकृष्णः – कंसाय करः किमर्थं दीयते ?

यशोदा – यतः सः राजा अस्ति ।

श्रीकृष्णः –सः करं नीत्वा किं सम्पादयति ?

यशोदा – सः जनेभ्यः करं स्वीकृत्य जनकल्याणं करोति । अस्तु, वार्ताम् एव करिष्यति अथवा किमपि अत्स्यति (खादिष्यति) ?

श्रीकृष्णः –मातः ! नवनीतं मोदकं च प्रदीयेतां ।

यशोदा – तिष्ठ, आनयामि ।



( यशोदा माता मोदकम् आनीय कृष्णाय ददाति । कृष्णः अपि खादित्वा यशोदामातरं वदति ।)

कृष्णः – मातः ! अहं क्रीडार्थे गन्तुम् इच्छामि ।

यशोदा – अस्तु, गच्छतु । शीघ्रं निवर्तनं करोतु ।

( मार्गे चलन्तं कृष्णं एका गोपी स्थगयति (रुद्धवती ) ।

गोपी – कृष्ण ! सन्देशं खादिष्यति वा ?

कृष्णः – आम् ! ददातु ।

गोपी – पूर्वं नृत्यं करोतु तदा दास्यामि ।

कृष्णः – निश्चयं, दास्यति न वा । पश्यतु, नृत्यामि ।

गोपी – शिरसि घटं संस्थाप्य नृत्यतु । अधिकान् सन्देशान् दास्यामि ।

कृष्णः – भवती मिथ्याभाषिणी एव । अहं कदापि भवत्यः सम्मुखे नृत्यं न करिष्यामि ।

( कृष्णः तस्मात् स्थानात् स्वमित्रान मेलितुं वटवृक्षस्य समीपं गच्छति ।)

सुबलः – कृष्ण ! अद्य विलम्बः किमर्थं कृतः ?

कृष्णः – अद्य मार्गे आगमनसमये एका गोपी मां स्थगितवती (रुदद्धवती) ।

मधुमङ्गलः – सा किमर्थं त्वां स्थगितवती ?

कृष्णः – श्रूयताम् । सा सन्देशप्रलोभनं दत्त्वा मां नर्तितवती । मयि नृत्यं कृते सति अपि मह्यं सन्देशं न दत्तवती ।

सुबलः – एवम् अस्ति वा । वयं तस्याः गृहं गत्वा नवनीतं चोरयामः ।

मधुमङ्गलः – अवश्यम् एव गन्तव्यं । वयं कृष्णं प्रति तस्याः एतादृशं व्यवहारं सोढुं न शक्नुमः ।

(कृष्णादयः गोपाः गोप्याः गृहं गत्वा गृहस्य बहिः वार्तां कुर्वन्ति ।)

सुबलः – माता प्रभावती किं कुर्वती अस्ति तत् अस्माभिः ज्ञातव्यम् ।

मधुमङ्गलः – अस्माभिः तस्याः प्राङ्गणस्य भित्तिम् आरूह्य द्रष्टव्यम् ।

कृष्णः – ( कृष्णः द्वयोः गोपयोः स्कन्धौ आरूह्य ) अहं वदामि यत् माता किं करोति । सा दधिमन्थनं कृत्वा नवनीतं निष्कास्य अन्तः स्थापितवती । यूयं जानीथ वा एतादृशं नवनीतं कुत्रापि न लभ्यते । मुखे स्थापयन् एव गलनं भवति ।

सुबलः – अलं ! नवनीतस्य व्याख्यानेन । अस्माभिः चिन्तनीयं यत् तस्याः गृहे प्रवेशः कथं भवेत् ?

कृष्णः – शुभा सूचना । माता प्रभावती शिरसि घटं निधाय यमुनां प्रतिगच्छति । अधुना तु अस्माकं मुहूर्तः समायातः ।

( माता प्रभावतीं गृहात् बहिः आगच्छन्तीं दृष्ट्वा गोपवृन्दाः निलीतवन्तः । तस्याः गमनान्तरं सर्वे गृहस्य अन्तः प्रविष्टाः । सर्वे बालाः गोपिकायाः गृहं गत्वा इतस्ततः नवनीतं अन्वेषयन्ति । )



सुबलः – नवनीतं तु अत्र न दृश्यते । कुत्र स्थापितवती ?

मधुमङ्गलः – आम् ! अस्माकम् अत्र आगमनं तु व्यर्थमेव जातम् ।

कृष्णः – न, न अत्रैव कुत्रचित् स्यात् । ( तदा उपरि दृष्ट्वा वदति ) नवनीतं तत्र अस्ति । अन्तःपटलं नवनीतस्य चत्वारः

घटाः अवलम्बिताः ।

श्रीदामः – परन्तु उपरि स्थितेभ्यः घटेभ्यः नवनीतं कथम् आनेष्यामः ?

सुबलः – भोः मित्राणि । कृष्णे उपस्थिते सति किमपि अशक्यं न अस्ति ।

( सर्वे गोपाः योजनां कृत्वा मण्डलीं निर्माय कृष्णं स्व उपरि आरोहयन्ति । कृष्णः उपरिष्टात् नवनीतम् अवतार्य सर्वान् भोजयति स्वयं च खादति । )

कृष्णः – मधुमङ्गल ! प्रथमं त्वं ग्रहणं कुरु । त्वं लम्बोदरः असि ।

कृष्णः – सुबल ! अहं तुभ्यं ददामि । त्वं सर्वान् भोजय ।

( अल्पकालानन्तरं सर्वे तृप्ताः जाताः )

श्रीदामः – हे कृष्ण ! माता प्रभावती आगच्छन्ती अस्ति । अस्माभिः पलायनं करणीयम् ।


( प्रभावती नवनीतं विकीर्णं दृष्ट्वा अवगतवती यत् एतत् कार्यं कृष्णस्य एव अस्ति । परन्तु कृष्णः तस्मात् स्थानात् गृहं आगच्छत् (आगतवान्) । तदानीं कृष्णस्य स्नानस्य समयः जातः आसीत् । )

यशोदा – कृष्ण ! अत्र आगच्छतु, स्नापयामि ।

रोहिणी – अहमपि कृष्णं स्नापयितुं भवत्याः सहायं करिष्यामि ।

यशोदा – रोहिणि ! पाटलजलं चन्दनं च आनयतु ।

रोहिणी – (पाटलजलं चन्दनं च आनीय) अत्र स्तः । अहम् कृष्णं हस्ताभ्यां गृह्णामि, भव–ती स्नापयतु ।



( रोहिणीयशोदे गायन्त्यौ कृष्णं स्नापितवत्यौ)

रोहिणी – (स्नानात् पश्चात्) यशोदे ! यावत् अहं कृष्णस्य शरीरस्य प्रोञ्छनं करोमि तावत् भवती तस्य वस्त्राणि आनीय आगच्छतु ।

यशोदा – रोहिणि ! एते धौतवस्त्रं कटिसूत्रं च धारयतु । तदनन्तरं कञ्चुकमपि ।

कृष्णः – मातः ! मया मित्रैः सह वत्सान् चारयितुं वनं गन्तव्यम् अस्ति । अतः एव शीघ्रं उत्तरीयम्, उष्णीशम्, मयूरपुच्छम्, केयूरे, कुण्डले, कण्ठा–भरणं च धारयतु ।

रोहिणी – बाल ! अचिरेण एव त्वां अलङ्करिष्यावः । त्वया चिन्ता न कार्या ।

गोपाः – कृष्ण ! किं त्वं सिद्धः असि ?

कृष्णः – अहं प्रायः सिद्धः एव । रोहिणी माता मम ललाटे तिलकं स्थापयति ।

गोपाः – कृष्ण ! त्वं अतीव रमणीयः दृश्यसे । तव वेणुः कुत्र अस्ति ?

यशोदा – रोहिणि ! कृष्णस्य मुरलीं तस्य कटि प्रदेशे स्थापयतु ।
श्रीदामः – कृष्ण ! दर्पणं पश्य । अहो ! कियान् सुन्दरः असि ?

यशोदा – मम पुत्रः वृन्दावनस्य राजा एव । कथं सुन्दरः न दृश्येत ।

रोहिणी – (भोजनस्थालिकाम् आनीय) कृष्ण ! शीघ्रं खादतु । तव कृते अहं पृथुकं दधिवटकं नवनीतं मुद्गलप्सिकां च पक्ववती अस्मि ।



( कृष्णः आनन्देन भुक्त्वा मध्याह्नभोजनस्य कृते हस्ते पोटलिकां धृत्वा स्वमित्रैः सह वत्सान् पुरतः कृत्वा वनं प्रति निर्गतः । )

* हरे कृष्ण !*

<u>*प्रश्नोत्तर–विभागः*</u>

१. यदा माता यशोदा कृष्णम् उत्थापितुम् आगच्छति तदा कृष्णस्य कीदृशी प्रतिक्रिया भवति ? वर्ण्यताम् ।

२. मार्गे गच्छता कृष्णेन सह गोप्याः संवादं क्रमशः वर्णयन्तु ।

३. यदा कृष्णः गोप्याः विषये स्वमित्राणि वदति तदा ते किं कर्तुम् उद्यताः भवन्ति ?

४. माता प्रभावत्याः: नवनीतस्य प्रकृतिं वदन्तु ।

५. माता प्रभावती शिरसि घटं निधाय कुत्र गच्छति ?

६. यदा गोपाः प्रभावत्याः गृहे नवनीतं न दृष्टवन्तः तदा ते किं प्रलपितवन्तः ?

७. गोपाः नवनीतं खादितुं कम् उपायं कृतवन्तः ?

८. कृष्णः प्रथमं नवनीतं कस्मै दत्तवान् ?

९. माता प्रभावत्याः आगमनस्य सूचनां कः दत्तवान् ?

१०. रोहिणीयशोदे कृष्णं काभ्यां स्नानं कारितवत्यौ ?

११. यदा रोहिणी कृष्णं वस्त्राणि धारयन्ती आसीत् तदा कृष्णः किं वदति ?

१२. रोहिणी कृष्णस्य सम्मुखे भोजनस्य स्थालिकाम् आनीय किं वदति ?

१३. कृष्णस्य सौन्दर्यंदृष्ट्वा गोपाः किं कथयन्ति ?

१४. कृष्णः किं किं वस्त्रं आभूषणं च धरति ? भवते कानि आभूषणानि रोचन्ते ?

## *<u>व्याकरण–विभागः</u>*

१. निम्नलिखितधातुरूपाणां मूलधातून् सम्यक्रूपेण अवलोकयन्तु वाक्यानि च रचयन्तु ।

क). वद्– हरिश्चन्द्रः सदैव सत्यं **वदति** स्म ।

उपरि दृष्ट्वा निम्नलिखितक्रियापदानाम् अपि प्रयोगं कुर्वन्तु।

दा, भुज्, शक्, प्र+लप्

३. लिङ्लकार–प्रयोगः

एकवचन–बहुवचन प्रयोगाः

क) कृपाकाङ्क्षी मन्दिरं गच्छेत् । कृपाकाङ्क्षिणः मन्दिरं गच्छेयुः ।
ख) संन्यासी वनं गच्छेत् । संन्यासिनः वनं गच्छेयुः ।
ग) जनः गीतां पठेत् । जनाः गीतां पठेयुः ।
घ) भक्तः रामायणं पठेत् । भक्ताः रामायणं पठेयुः ।
ङ) सः किं कुर्यात्? ते किं कुर्युः ?
च) कः किं कुर्यात्? के किं कुर्युः ?
च) भवान् दानं कुर्यात्। भवन्तः दानं कुर्युः ।
ज) मर्त्यः सत्यं वदेत् । मर्त्याः सत्यं वदेयुः ।
झ) भक्तिकामी कृष्णकथां वदेत् । भक्तिकामिनः कृष्णकथां वदेयुः ।
ञ) स्त्री अमृतं पिबेत् । स्त्रियः अमृतं पिबेयुः ।
ट) देवी सोमरसं न पिबेत् । देव्यः सोमरसं न पिबेयुः ।
उपरि दृष्ट्वा निम्नलिखितशब्दानाम् अपि प्रयोगं कुर्वन्तु ।

शक्नुयात्, स्थापयेत्, भजेत्, वर्जयेत्, नयेत् ।
शक्नुयुः, स्थापयेयुः, भजेयुः, वर्जयेयुः, नयेयुः ।

उत्तमपुरुषप्रयोगः

क) अहं गच्छेयम् । वयं गच्छेम ।
ख) अहं गीतां पठेयम् । वयं गीतां पठेम ।
ग) अहं जपं कुर्याम् । वयं जपं कुर्याम ।
घ) अहं सत्यं वदेयम् । वयं सत्यं वदेम ।
ङ) अहं जलं पिबेयम् । वयं जलं पिबेम ।
च) अहं वृन्दावनं कथं गच्छेयम् ? वयं वृन्दावनं कथं गच्छेम ?
च) अहं स्वास्थ्यलाभाय किं पिबेयं ? वयं स्वास्थ्यलाभाय किं पिबेम ?
ज) अहं कृष्णं भजेयम् । वयं कृष्णं भजेम ।
झ) किम् अहं पठेयम् ? किं वयं पठेम ?
उपरि दृष्ट्वा निम्नलिखितशाब्दानाम् अपि प्रयोगं कुर्वन्तु ।

हसेयम्–हसेम, जानीयाम्–जानीम, स्थापयेयम्–स्थापयेम, भवेयम्–भवेम ।

॥ हरि ॐ तत्सत् ॥